श्रीः

श्री लक्ष्मीनृसिंह परब्रह्मणे नमः

श्री पद्मावती समेत श्रीवेङ्कटेशाय नमः



# श्री वेङ्कटेशाष्टोत्तरशतनाम स्तोत्रम्

श्रियःकान्ताय कल्याण निधये नेथयेऽर्थिनाम् ।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गळम् ॥
श्री वेङ्कटाचलाधीशं श्रियाऽध्यासित वक्षसम् ।
श्रितचेतनमन्दारं श्रीनिवासमहं भजे ॥

मुनयः --

सूत सर्वार्थ तत्वज्ञ सर्ववेदान्तपारग ।
येन चाराधितस्सद्यः श्रीमद्वेङ्कटनायकः ॥
भवत्यभीष्टसर्वार्थप्रदस्तत् ब्रूहिनो मुने ।
इति पृष्टस्तदा सूतो ध्यात्वास्वात्मनि तत् क्षणात् ॥

श्रीसूतः --

उवाच मुनिशार्दूलान् श्रूयतामिति वै मुनिः ।
अस्ति किञ्चिन्महद्गोप्यं भगवत्प्रीति कारकम् ॥
पुरा शेषेण कथितं कपिलाय महात्मने ।
नाम्नामष्ट शतं पुण्यं पवित्रं पापनाशनम् ॥
आदाय हेमपद्मानि स्वर्णदी सम्भवानि च ।
ब्रह्मा तु पूर्वमभ्यर्च्य श्रीमद्वेङ्कटनायकम् ॥
अष्टोत्तर शतैर्दिव्यैर्नामभिर्मुनि पूजितैः ।
स्वाभीष्टं लब्धवान् ब्रह्मा सर्वलोकपितामहः ॥
भवद्भिरपि पद्मैश्च समर्च्यस्तैश्च नामभिः ।
तेषां शेषनगाधीश मान सोल्लास कारिणाम् ॥
नाम्नाष्ट शतं वक्ष्ये वेङ्कटाद्रि निवासिनः ।
आयुरारोग्यदं पुंसां धनधान्य सुख प्रदम् ॥
ज्ञान प्रदं विशेषेण महदैश्वर्य कारकम् ।
अर्चयेन्नामभिर्दिव्यैर्वेङ्कटेश पदाङ्कितैः ॥
नाम्नामष्टशतस्यास्य ऋषिर्ब्रह्मा प्रकीर्तितः ।
छन्दोऽनुष्टुप्तथा देवो वेङ्कटेश उदाहृतः ॥
नीलगोक्षीरसम्भूतो बीजमित्युच्यते बुधैः ।
श्रीनिवासस्तथाशक्तिर्हृदयं वेङ्कटाधिपः ॥

विनियोगस्तथाऽभीष्टसिद्ध्यर्थे च निगद्यते।

(अष्टोत्तरशतनाम स्तोत्रप्रारंभः)

ओं नमो वेङ्कटेशाय  शेषाद्रि निलयाय च॥

वृषद्दग्गोचरायथ  विष्णवे सततं नमः।

सदञ्जन गिरीशाय वृषाद्रि पतये नमः॥

मेरुपुत्र गिरीशाय  सरस्स्वामि तटीजुषे।

कुमाराकल्प सेव्याय वज्रिदृग्विषयाय च॥

सुवर्चला सुतन्यस्त सैनापत्य भराय  च।

रामाय पद्मनाभाय सदा वायुस्तुताय च॥

त्यक्त वैकुण्ठलोकाय गिरिकुञ्ज विहारिणे।

हरिचन्दन गोत्रेन्द्र स्वामिने सततं नमः॥

शङ्खराजन्य नेत्राब्ज विषयाय नमो नमः।

वसूपरिचर त्रात्रे कृष्णाय सततं नमः॥

अब्धिकन्या परिष्वक्त वक्षसे वेङ्कटाय च।

सनकादि महायोगि पूजिताय नमो नमः॥

देवजित्प्रमुखानन्द दैत्य संघ प्रणाशिने।

श्वेत द्वीप वसन्मुक्त पूजितांघ्रि युगाय च॥

शेष पर्वतरूपत्व प्रकाशनपराय च।

सानुस्थापित ताक्ष्र्याय ताक्ष्र्याचल निवासिने॥

मायागूढविमानाय गरुडस्कन्धवासिने ।
अनन्तशिरसे नित्यमनन्ताक्षाय ते नमः ॥
अनन्तचरणायथ श्रीशैलनिलयाय च ।
दामोदराय ते नित्यं नीलमेघनिभाय च ॥
ब्रह्मादि देव दुर्दर्श विश्वरूपाय ते नमः ।
वैकुण्ठागत सद्धेम विमनान्तर्गताय च ॥
अगस्त्याभ्यर्थिता शेष जनदृग्गोचराय च ।
वासुदेवाय हरये तीर्थपञ्चक वासिने ॥
वामदेवप्रियायथ जनकेष्टप्रदाय च ।
मार्कण्डेय महातीर्थ जातपुण्य प्रदाय च ॥
वाक्पति ब्रह्मदात्रे च चन्द्रलावण्यदायिने ।
नारायण नगेशाय ब्रह्म क्लृप्तोत्सवाय च ॥
शङ्ख चक्र वरानम्र लसत्कर तलाय च ।
द्रवन्मृग मदासक्त विग्रहाय नमो नमः ॥
केशवाय नमो नित्यं नित्ययौवन मूर्तये ।
अर्थितार्थ प्रदात्रे च विश्वतीर्थाघहारिणे ॥
तीर्थस्वामि सरस्स्नात जनाभीष्ट प्रदायिने ।
कुमारधारिका वासस्कन्धाभीष्ट प्रदाय च ॥

जानुदघ्न समुद्भूत पोत्रिणे कूर्ममूर्तये ।

किन्नरद्वन्द्व शापान्त प्रदात्रे विभवे नमः ॥

वैखानस मुनेश्रेष्ठ पूजिताय नमो नमः ।

सिंहाचल निवासाय श्रीमन्नारायणाय च ॥

सद्भक्त नीलकण्ठार्च्य नृसिंहाय नमो नमः ।

कुमुदाक्ष गणश्रेष्ठ सैनापत्य प्रदाय च ॥

दुर्मेधः प्राणहर्त्रे च श्रीधराय नमो नमः ।

क्षत्रियान्तक रामाय मत्स्य रूपाय ते नमः ॥

पाण्डवारि प्रहर्त्रे च श्रीकराय नमो नमः ।

उपत्यका प्रदेशस्थ शङ्कर ध्यातमूर्तये ॥

रुक्माब्ज सरसीकूल लक्ष्मीकृत तपस्विने ।

लसल्लक्ष्मी करांभोज दत्त कल्हारक स्त्रजे ॥

सालग्राम निवासाय शुक दृग्गोचराय च ।

नारायणार्थिताशेष जनदृग्विषयाय च ॥

मृगयारसिकायाथ वृषभासुर हारिणे ।

अञ्जनागोत्र पतये वृषभाचल वासिने ॥

अञ्जनासुत दात्रे माधवीयाघ हारिणे ।

प्रियङ्गु प्रियभक्षाय श्वेतकोलवराय च ॥

नीलधेनु पयोधारा सेक देहोद्भवाय च ।
शङ्कर प्रियमित्राय चोळपुत्र प्रियाय च ॥
सुधर्मिणी सुचैतन्य प्रदात्रे मधुघातिने ।
कृष्णाख्य विप्र वेदान्त देशिकत्व प्रदाय च ॥
वराहाचल नाथाय बलभद्राय ते नमः ।
त्रिविक्रमाय महते हृषीकेशाय ते नमः ॥
अच्युताय नमो नित्यं नीलाद्रिनिलयाय च ।
नमः क्षीराब्धि नाथाय वैकुण्ठाचल वासिने ॥
मुकुन्दाय नमो नित्यमनन्ताय नमो नमः ।
विरिञ्चाभ्यर्थितानीत सौम्यरूपाय ते नमः ॥
सुवर्णमुखरी स्नात मनुजाभीष्ट दायिने ।
हलायुध जगत्तीर्थ समस्त फलदायिने ॥
गोविन्दाय नमो नित्यं श्रीनिवासाय ते नमः ।
अष्टोत्तर शतं नाम्नां चतुर्थ्या नमसाऽन्वितम् ॥

फलश्रुतिः --

यःपठेच्छृणुयान्नित्यं श्रद्धा भक्ति समन्वितः ।
तस्य श्रीवेङ्कटेशस्तु प्रसन्नो भवति ध्रुवम् ॥
अर्चनायां विशेषेण ग्राह्यमष्टोत्तरं शतम्
वेङ्कटेशाभिधेयैर्यो वेङ्कटाद्रि निवासिनम् ॥

अर्चयेन्नामभिस्तस्य फलं मुक्तिर्न संशयः।
गोपनीयमिदं स्तोत्रं सर्वेषां न प्रकाशयेत्॥
श्रद्धा भक्ति युजामेव दापयेन्नाम सङ्ग्रहम्।
इति शेषेण कथितं कपिलाय महात्मने॥
कपिलाख्य महायोगि सकाशात्तु मया श्रुतम्।
तदुक्तं भवतामद्य सद्यः प्रीतिकरं हरेः॥

इति श्री वेङ्कटेशाश्टोत्तरशतनामस्तोत्रं संपूर्णं

| HOME | STOTRA LIST |
|---|---|